तृषितो मोहमायाति मोहात् प्राणान् विमुञ्चति।
अतः सर्व्वास्ववस्थासु न क्वचिद्वारि वारयेत् ॥
हारीतश्च ।
तृष्णा गरीयसी घोरा सद्यःप्राणविनाशिनी ।
तस्माद्देयं तृषार्त्ताय पानीयं प्राणधारणम् ॥
अपथ्यं पेयमपि जलं ज्वरी किञ्चिद्वारयन् पिबेद्यत आह सुश्रुत एव ।
जीवनं जीविनां जीवो जगत् सर्व्वन्तु तन्मयम् ।
अतोऽत्यन्ततया सर्व्वो न क्वचिद्वारि वारयेत् ॥
जीवनं जलम् ॥ किञ्चित्तु वारयेदेव । तथा च ।
ज्वरे नेत्रामये कोष्ठे मन्देऽग्नावुदरे तथा ।
अरोचके प्रतिश्याये प्रसेके श्वयथौ क्षये ॥
व्रणे च मधुमेहे च पानीयं मन्दमाचरेत् ॥
प्रसेके मुखप्रसेके । मन्दमाचरेत् अल्पं पिबेत् । यत आह ।
“अतियोगेन सलिलं तृष्यतोऽपि प्रयोजितम् ।
प्रयाति श्लेष्मपित्तत्वं ज्वरितस्य विशेषतः ॥*॥
तत्र जलं ज्वरी शीतलं न पिबेदित्याह सुश्रुतः ।
नवज्वरे प्रतिश्याये पार्श्वशूले गलग्रहे ।
सद्यःशुद्धौ तथाध्माने व्याधौ वातकफोद्भवे ।
अरुचिग्रहणीगुल्मश्वासकासेषु विद्रधौ ।
हिक्कायां स्नेहपाने च शीतं वारि विवर्ज्जयेत् ॥”
अन्यच्च स एव ।
“सेव्यमानेन शीतेन ज्वरस्तोयेन वर्द्धते ।”
अत्र शीतं जलमक्वथितं निषिद्धम् । तथा च क्वथितं ग्राह्यं आयातम् ॥ तत्र क्वथितस्य विधिर्गुणाश्च ।
“क्वाथ्यमानन्तु निर्व्वेगं निष्फेनं निर्म्मलञ्च यत् ।
तत्तोयं क्वथितं ज्ञेयं दोषघ्नं पाचनं लघु ॥
निर्व्वेगं शनैः ॥ क्वथितस्य विषयानाह सुश्रुतः ।
“वातश्लेष्मज्वरार्त्ताय हितमुष्णाम्बु तृष्यते ।
दीपनं स्यात् कफच्छेदि वातपित्तानुलोमनम् ॥
तद्धि मार्द्दवकृद्दोषस्रोतसां शीतमन्यथा ॥”
वाग्भटश्च ।
“तृष्णायां प्राशयेदुष्णाम्बु पिबेद्वातकफज्वरे ।
तत् कफं विलयं नीत्वा तृष्णामाशु निवर्त्तयेत् ॥
उदीर्य्य चाग्निं स्रोतांसि मृदूकृत्य विशोधयेत् ।
वातपित्तकफस्वेदशकृन्मूत्राणि सारयेत् ॥” * ।
अथोष्णोदकस्य लक्षणं गुणाश्च ।
“क्वाथ्यमानन्तु निर्व्वेगं निष्फेनं निर्म्मलं तथा ।
अर्द्धावशिष्टं यत्तोयं तदुष्णोदकमुच्यते ॥
ज्वरकासकफश्वासवातपित्तामर्मेदसाम् ।
नाशनं वस्तिसंशोधि पथ्यमुष्णोदकं सदा ॥*॥”
अथर्त्तुभेदे जलस्य पाकभेदः ।
त्रिपादशेषं सलिलं ग्रीष्मे शरदि शस्यते ।
हिमेऽर्द्धशेषं शिशिरे तथा वर्षावसन्तयोः ॥”*॥
अन्ये तु ।
“निदाघे त्वर्द्धपादोनं पादहीनन्तु शारदम् ।
शिशिरे च वसन्ते च हिमे चार्द्धावशेषितम् ॥
अष्टमांशावशेषन्तु वारि वर्षासु शस्यते ।
इति केचिद्बुधाः प्राहुर्व्यक्तागमदर्शनात् ॥”
केचित्तु ।
“वसुष्वङ्गेषु वाणेषु वेदेषु त्रिषु पञ्चयोः ।
एकभागावशेषं स्यादम्बु वर्षादिषु क्रमात् ॥”
अत्र दोषाणां यथोल्वणता क्षीणता वा तथा व्यवस्था कल्पनीया ॥
“तत् पादहीनं पित्तघ्नमर्द्धहीनन्तु वातनुत् ।
त्रिपादहीनं श्लेष्मघ्नं संग्राह्यग्निप्रदं लघु ॥” *॥
त्रिपादहीनस्य तन्त्रान्तरे आरोग्याम्बुसंज्ञा ।
तस्य लक्षणं गुणाश्च ।
“पादशेषन्तु यत्तोयमारोग्याम्बु तदुच्यते ।
आरोग्याम्बु सदा पथ्यं कासश्वासकफापहम् ॥
सद्यो ज्वरहरं ग्राहि दीपनं पाचनं लघु ।
आनाहपाण्डुशूलार्शोगुल्मशोथोदरापहम् ॥”
अथर्त्तुभेदे जलस्य ग्रहणाय देशभेदः ।
“हेमन्ते शिशिरे चाम्बु सारसं वा तड़ागजम् ।
वसन्तग्रीष्मयोः कौप्यं वाप्यं वा नैर्झरं हितम् ॥
नादेयं वारि नादेयं वसन्तग्रीष्मयोर्बुधैः ।
विषवत् पत्रपुष्पादिदुष्टं निर्झरयोगतः ॥
औद्भिदं चान्तरीक्षं वा कौपं प्रावृषि च स्मृतम् ।
शस्तं शरदि नादेयं नीरमंशूदकं परम् ॥
दिवा रविकरैर्जुष्टं शीतं शीतकरैर्निशि ॥
ज्ञेयमंशूदकं नाम स्निग्धं दोषत्रयापहम् ।
अनभिष्यन्दि निर्द्दोषमान्तरीक्षजलोपमम् ॥
बल्यं रसायनं मेध्यं शीतं लघु सुधासमम् ॥”
अन्यच्च ।
“शरद्यगस्त्योदयादखिलं सलिलं हितम् ।
वृद्धसुश्रुतश्च ।
“कार्त्तिके मार्गशीर्षे च पयोमात्रं प्रशस्यते ॥”
यथर्त्तुपक्वमपि जलं विषयविशेषे शीतलं पिबेदित्याह सुश्रुतः ।
“दाहातिसारपित्तासृङ्मूर्च्छामद्यविषार्त्तिषु ।
मूत्रकृच्छ्रे पाण्डुरोगे तृष्णाच्छर्द्दिभ्रमेषु च ॥
मद्यपानात् समुद्भूते रोगे पित्तोत्थिते तथा ।
सन्निपातसमुत्थे च शृतं शीतं प्रशस्यते ॥”
क्वथितस्य जलस्य शीतलकरणविशेषे गुणविशेषमाह सुश्रुतः ।
“शृताम्बु तत्त्रिदोषघ्नं यदन्तर्व्वाष्पशीतलम् ।
अरूक्षमनभिष्यन्दि लघुमिष्टं ज्वरघ्नवत् ॥
धारापातेन विष्टम्भि दुर्ज्जरं पवनाहृतम् ॥
अन्तर्व्वाष्पशीतलं पिहितमेव शीतलम् ।
अत्रापरेऽपि विशेषाः ।
“दिवा शृतं पयो रात्रौ गुरुतामधिगच्छति ।
रात्रौ शृतं दिवा पीतं गुरुत्वमधिगच्छति ॥
तत्तु पर्य्युषितं वह्निगुणभ्रष्टं त्रिदोषकृत् ।
गुर्व्वम्लपाकं विष्टम्भि सर्व्वरोगेषु निन्दितम् ॥
शृतं शीतं पुनस्तप्तं तोयं विषसमं भवेत् ।
निर्य्यूहोऽपि तथा शीतः पुनस्तप्तो विषोपमः ॥”
रात्रौ तूष्णोदकस्य लक्षणमन्यदाह ।
“अष्टमेनांशशेषेण चतुर्थेनार्द्धकेन वा ।
अथवा क्वथनेनैव सिद्धमुष्णोदकं वदेत् ॥”
तस्य गुणाः ।
“श्लेष्मानिलामदोषघ्नं दीपनं वस्तिशोधनम् ।
श्वासकासज्वरहरं पीतमुष्णोदकं निशि ॥”
अन्यच्च ।
“भिनत्ति श्लेष्मसङ्घातं मारुतं चापकर्षति ।
अजीर्णं जरयत्याशु पीतमुष्णोदकं निशि ॥”
रात्रावुष्णोदकञ्च तप्तमेव पिबेदित्याह ।
“उष्णं तदग्निजननं लघ्वच्छं वस्तिशोधनम् ।
पार्श्वरुक्पीनसाध्मानहिक्कानिलकफापहम् ॥
शस्तं हृद्‌श्वासशूलेषु सद्यःशुद्धौ नवज्वरे ॥”
विषयविशेषे त्याममेव जलं शीतलं पिबेदित्याह सुश्रुतः ।
“मूर्च्छापित्तोष्णदाहेषु विषे रक्ते मदात्यये ।
भ्रमश्रमपरीतेषु तमके वमथौ तथा ॥
धूमोद्गारेऽविदग्धेऽन्ने शोषे च मुखकण्ठयोः ।
ऊर्द्धगे रक्तपित्ते च शीतमम्भः प्रशस्यते ॥”
शीतमम्भः आममेव न तु क्वथितम् । क्वथितञ्च शीतं दाहादिषु यदुक्तं तत् सज्वरेषु । विज्वरेषु तु दाहादिष्वामं शीतं प्रशस्यते इति भेदः ॥*॥
आमादिजलानां जठराग्निना पाककालावधिमाह ।
> “आमं जलं पाकमुपैति यामं
> पक्वं पुनः शीतलमर्द्धयामम् ।
> पक्वं कदुष्णञ्च ततोऽर्द्धकालं
> कालात्ययः पीतजलस्य पाके ॥

पित्तमद्यविषोत्थेषु तिक्तकैः शृतशीतलम् ॥”
जलं हितमिति शेषः ॥ *॥ तिक्तानि कटुकानि तेभ्यो निर्धार्य्य योगमाह सुश्रुतः ।
“मुस्तपर्पटकोदीच्यच्छन्नाख्योशीरचन्दनैः ।
शृतं शीतं जलं दद्यात् तृड्दाहज्वरशान्तये ॥”
छन्नाख्य धान्यकम् । यत आह निघण्टौ धन्वन्तरिः । कुस्तुम्बुरः सवितारा छन्ना धान्यं वितुन्नकमित्यादि । तद्गुणाश्च ।
“धान्यकं दीपनं रुच्यं पाचनं स्वादुपाकि च ।
दोषत्रयतृषादाहश्वासकासज्वरप्रणुदित्यादि ॥”
चक्रदत्तवङ्गसेनवृन्दादयः छन्नास्थाने नागरं पठन्ति । तद्यथा,—
“मुस्तपर्पटकोशीरचन्दनोदीच्यनागरैरिति ।
नागरं कटुकमपि नात्र पित्तजनकं मधुरपाकित्वादिति तेषामभिप्रायः । नागरं नागरमुस्तकं इति केचित् । क्वचिदेकदेशेन समुदायोऽवगम्यते । यथा भीमो भीमसेन इति । वीसटे तु नागरस्थाने पद्मकम् ॥ * ॥ एतस्य प्रक्रिया । चन्दनैरित्यत्र सहार्थे तृतीया । तेन मुस्तादिभिः षड्भिरामैरेव सूक्ष्मैः सहितं जलं शृतं जलमेव केवलं यथर्त्तुपक्वं पश्चाच्छीतलीकृतं दद्यात् । तथा च वङ्गसेनः ।
यदम्बु शृतशीतासु षडङ्गादि प्रयुज्यते ।
कर्षमात्रं ततो द्रव्यं साधयेत् प्रास्थिकेऽम्भसि ॥
अस्यायमर्थः । यत् हेतोः । अम्बु जलेषु । शृतशीतासु शृतासु केवलास्वेव यथर्त्तुपक्वासु । शीतासु शीतलीकृतासु । षडङ्गादि द्रव्यं प्रयुज्यते । आममेव धंसुष्क जले स्थाप्यते । ततः प्रक्षेप्यत्वात् कर्षमात्रं द्रव्यं समुदितं षडङ्गादि